श्रीः

# आयुःशान्तिः

## अब्दपूर्तिशान्तिः, षष्ट्यब्दपूर्तिशान्तिश्च
## शान्तिकुसुमाकरस्थे शौनकोक्ते

2012-02-26

# अब्दपूर्तिशान्तिः

अब्दपूर्त्यां शिशोर्दोषो भवेद्दुष्टग्रहैर्महान् ।
तद्दोषपरिहारार्थं शान्तिं कुर्याद् यथाविधि ॥ १

अब्दपूर्त्युदितां शान्तिं शिशोरायुष्यवर्धनीम् ।
कुर्यादाचार्यसंयुक्तो यजमानो यथाविधि ॥ २

मासि मासि च जन्मर्क्षे शान्तिः स्याद् विभवे सति ।
द्वितीयवत्सरस्यादौ शिशोर्जन्मर्क्षसंयुते ॥ ३

सङ्गवव्याप्तियुक्ते च शान्तिमेतां समाचरेत् ।
आदौ शिशुं स्नापयेच्च तैलाभ्यङ्गपुरःसरम् ॥ ४

गुरुदेवाग्निविप्राणां पूजां कुर्यात् ततः परम् ।
कटिसूत्रं शिशोर्बद्ध्वा पुष्पैः शेखरमाचरेत् ॥ ५

अनुज्ञाप्य द्विजानादौ गणेशं संप्रपूज्य च ।
सङ्कल्प्य च यथान्यायं गणनाथं विसृज्य च ॥ ६

आचार्यं वरयेत् पश्चाद् यथालाभं च ऋत्विजः ।
आचार्यः प्राङ्मुखो भूत्वा कुम्भे त्र्यम्बकमर्चयेत् ॥ ७

श्रीरुद्रं चमकं चैव पुंसूक्तं विष्णुसूक्तकम् ।
श्रीसूक्तं भूमिसूक्तं च वारुणं सूक्तमेव च ॥ ८

ब्रह्मसूक्तं रुद्रसूक्तं मृत्युसूक्तं तथैव च ।
आयुष्यसूक्तं जप्त्वाऽथ पावमानीस्ततो जपेत् ॥ ९

पञ्चशान्तीर्घोषशान्तिमन्ततश्च ततो जपेत् ।
नमो ब्रह्मण इत्यन्तमृत्विग्भिस्तु जपेत् सह ॥ १०

कुम्भस्य पश्चिमे भागे प्रतिष्ठाप्य हुताशनम् ।
स्वगृह्योक्तविधानेन मुखान्तं च ततश्चरेत् ॥ ११

दधिमध्वाज्यसंमिश्रैर्दूर्वाग्रैर्होममाचरेत् ।
त्र्यम्बकेन च मन्त्रेण अष्टोत्तरशताहुतीः ॥ १२

शिशोर्जन्मर्क्षमन्त्रेण हुनेच्च द्वादशाहुतीः ।
आयुष्यहोमं कृत्वाऽथ होमशेषं समापयेत् ॥ १३

कुम्भाच्च रुद्रमुद्वास्य शिशुं प्राशय्य तज्जलम् ।
प्रोक्षयेद्वैदिकैर्मन्त्रैः शिशुं कुम्भजलेन च ॥ १४

ब्राह्मणान् भोजयेत् पश्चादाशिषो वाचयेत् ततः ।
आचार्यपूजां कृत्वाऽथ ऋत्विजः पूजयेत् तथा ॥ १९

ग्रामं प्रदक्षिणीकृत्य वाद्यघोषपुरःसरम् ।
आशीर्वादं ततह् कुर्याद् वस्त्रभूषादि दापयेत् ॥ २०

॥ इति अब्दपूर्तिशान्तिः ॥

# षष्ट्यब्दपूर्तिशान्तिः

## कारिका

षष्ट्यब्दपूर्तिकाले तु वारादिर्बहुदोषदः ।
तद्दोषपरिहाराय शान्तिं कुर्याद् विचक्षणः ॥ १

तदिधानमहं वक्ष्ये श्रृण्वन्तु मुनिपुङ्गवः ।
तत्पूर्वदिवसे विप्रैः सह गत्वा महानदीम् ॥ २

अनुज्ञापूर्वकं स्नात्वा साद्गुण्यायार्पयेद्धनम् ।
गृहं समागत्य ततो भोजयेत् षड्रसैर्द्विजान् ॥ ३

स्वयं हविष्यमश्नीयात् स्थण्डिले शयनं चरेत् ।
ब्रह्मचर्येण तां रात्रिं यापयेद् देवचिन्तया ॥ ४

प्रातः परेद्युरुत्थाय नदीं गत्वाऽरुणोदये ।
स्नात्वा सन्ध्यादिकर्माणि कृत्वाऽहूय द्विजान् शुचीन्॥ ५

देवाध्ययनसंपन्नान् सुशीलान् सत्यवादिनः ।
तेभ्यः प्रणम्य पूर्वं तु वृणुयात् षष्टिसङ्ख्यया ॥ ६

अञ्जलिं प्राङ्मुखः कृत्वा प्रार्थयेत् तान् द्विजांस्ततः ।
वेदवेदाङ्गतत्त्वज्ञा यूयं सर्वे बहुश्रुताः ॥ ७

आचार्यसहिता भूत्वा मृत्युञ्जयमुखान् सुरान् ।
पूजयध्वमिति प्रार्थ्य मण्डपं कारयेत् ततः ॥ ८

तोरणाद्यैर्वितानैश्च कदलीस्तम्भकैरपि ।
रङ्गवल्ल्याऽप्यलङ्कृत्य तत्र वेदिं विधाय च ॥ ९

धान्यराशिं विनिक्षिप्य द्वादशाडकसंमितम् ।
तदर्धं तण्डुलांश्चैव तदर्धं तिलमाषकान् ॥ १०

उपर्युपरि संस्थाप्य दर्भानास्तीर्य साग्रकान् ।
सौवर्णान् राजतांस्ताम्रान् मृन्मयान्वा घटान्नवान् ॥ ११

प्रक्षाल्य धूपयित्वाऽथ शुद्धाद्भिः परिपूर्य च ।
आवाहयेत्तु कुम्भेषु वक्ष्यमाणांस्ततः सुरान् ॥ १२

मध्ये मृत्युञ्जयं तत्र दक्षिणे विधिमेव च ।
पश्चिमे तु महाविष्णुमुत्तरे रुद्रमर्चयेत् ॥ १३

मृकण्डुतनयं तस्य पूर्वभागे विनिक्षिपेत् ।
इन्द्रादिदिक्पालघटान् तत्तद्दिक्षु विनिक्षिपेत् ॥ १४

नवग्रहाश्वत्थामादिसप्तायुर्देवता अपि ।
अष्टाविंशतिनक्षत्रषष्टिवत्सरदेवताः ॥ १५

दिक्पालकुम्भान्तराले एतान् कुम्भान् विनिक्षिपेत् ।
यथावकाशं सप्तर्षिकलशान् स्थापयेत् पृथक् ॥ १६

षष्टिकुम्भान् स्थापयित्वा कुम्भरत्नं विनिक्षिपेत् ।
निक्षिप्य कूर्चान्नूर्ध्वाग्रानाम्रशाखा विनिक्षिपेत् ॥ १७

नालिकेरं निधायैतान्नववस्त्रेण वेष्टयेत् ।
दशनिष्कप्रमाणेन तदर्धार्धेन वा पुनः ॥ १८

निर्मितास्तु सुवर्णेन रजतेनापि वा पुनः ।
प्रतिमाः शोधयित्वा च पञ्चगव्यैर्यथाविधि ॥ १९

तत्तन्मनुं विलिख्यात्र निक्षिपेत् कलशोपरि ।
तन्तुभिश्च समावेष्ट्य गन्धाद्यैः परिपूज्य च ॥ २०

यजमानः समं पत्न्या धृत्वा चापि पवित्रकम् ।
नमस्कृत्य सभासद्भ्यः अनुज्ञां कारयेत् ततः ॥ २१

## अथ प्रयोगः

ॐ नम॒ः ० पृथि॒व्यै॥ सप्र॑थस॒भां ० उपा॑सताम्॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः। नमस्कृत्य, अशेषे ० स्वीकृत्य,

अमुकनक्षत्रे, अमुकराशौ जातस्य अमुकशर्मणः मम सहकुटुम्बस्य सर्वाभीष्टसिद्ध्यर्थं, मम षष्टितमे अब्दे अतीते, एकषष्टितमे वर्षे प्राप्ते, जन्ममासे जन्मर्क्षे, यो दोषः समजनि तद्दोषपरिहारद्वारा मम वेदोक्तायुरभिवृद्ध्यर्थं ००० शौनकोक्तप्रकारेण षष्ट्यब्दपूर्तिशान्तिजपहोमाख्यं कर्म कर्तुं योग्यतासिद्धिमनुगृहाण॥ इति दक्षिणाताम्बूलदानपुरःसरं ब्राह्मणेभ्योऽनुज्ञां लब्ध्वा,

करिष्यमाणकर्मणः निर्विघ्नेन परिसमाप्त्यर्थं विघ्नेश्वरपूजां कृत्वा, पूर्ववत् संकल्पयेत्। तथा चोक्तं –

# कारिका

“दक्षिणाद्यैः प्रतोष्यैतान् तेभ्योऽनुज्ञामवाप्य च ।
अविघ्नकर्मपूर्त्यर्थं पूजयेच्च गणाधिपम्” ॥ इति १

पुण्याहं वाचयित्वाऽथ तत्तीर्थैः प्रोक्ष्य मण्डपम्।
कृत्वाऽभ्युदयिकं श्राद्धं पितृणां तृप्तिहेतवे ॥ २

पुण्याहं च पुनः कृत्वा पित्रानाहूय च क्रमात् ।
आचार्यमृत्विजश्चैव वृणुयाच्च ततः परम् ॥ ३

आयुष्यहोमं चादित्यवन्दनं बोधिशाखिनः ।
प्रदक्षिणं शम्भुविष्ण्वोरश्वत्थस्य तथैव च ॥ ४

कर्तुं विप्रवरान् शुद्धानाहूय विनियोजयेत् ।
आचार्यः सह ऋत्विग्भिः पूजयेच्च यथाक्रमम् ॥ ५

ध्यात्वाऽवाह्य ततः प्राणान् प्रतिष्ठाप्यासनादिभिः ।
तं प्रकारमहं वक्ष्ये शृण्वन्तु मुनिपुङ्गवाः ॥ ६

# मृत्युञ्जयावाहनम्

ततो मृत्युञ्जयध्यानम् –

ध्यायेन्मृत्युञ्जयं साम्बं नीलकण्ठं चतुर्भुजम् ।
चन्द्रकोटिप्रतीकाशं पूर्णचन्द्रनिभाननम् ॥ १

बिम्बाधरं विरूपाक्षं चन्द्रालङ्कृतमस्तकम् ।
अक्षमालां दधानं च वरदं चाभयप्रदम् ॥ २

महार्हतुण्डलधरं हारालङ्कृतवक्षसम् ।
भस्मोद्धूलितसर्वाङ्गं फालनेत्रविराजितम् ॥ ३

व्याघ्रचर्मपरीधानं व्यालयज्ञोपवीतिनम् ।
पार्वत्या सहितं देवं सर्वाभीष्टार्पणोद्यतम् ॥ ४
इति ध्यात्वा,

एहि सर्वजगन्नाथ मृत्युञ्जय सदाशिव ।
मम पीडां हर क्षिप्रं प्रसन्नो वरदो भव ॥
इति प्रार्थ्य, त्र्यम्बकमन्त्रेणावाहयेत् ॥

# दिक्पालकावाहनम्

अथ इन्द्रध्यानम् –

एह्येहि सुरराजेन्द्र सर्वलोकैकनायक ।

पूजां गृहाण कृपया सर्वान् दोषानपाकुरु ॥

“त्रा॒तार॒मिन्द्रं॑ °” इति मन्त्रेणावाहनम् ॥

अथ अग्निध्यानम् –

सप्तहस्त चतुःशृङ्ग सर्वलोकप्रकाशक ।

ग्रहाण पूजां कृपया सुस्थिरो भव विष्टरे ॥

“त्वं नो॑ अग्ने॒ °” इत्यावाहनम् ॥

अथ यमध्यानम् –

कालदण्डधर श्रीमन् महामहिषवाहन ।

एह्येहि सुभगाकार धर्मराज नमोऽस्तुते ॥

“सु॒गन्नः॒ पन्थां॒ °” इत्यावाहनम् ॥

अथ निर्ऋतिध्यायम् –

रक्षो निर्ऋते श्रीमन् शिवपूजात्तवैभव ।

एह्यत्र पूजां गृह्णीष्व रक्ष मां कृपया विभो ।

“अस॑ुन्वन्तं॒” इत्यावाहनम् ॥

अथ वरुणध्यानम् –

नागपाशधर श्रीमन् नक्रवाह जलेश्वर ।

पूजां गृहाण मद्दत्तां सान्निध्यं कुरु ते नमः ॥

“तत्त्वा॑ यामि॒” इत्यावाहनम् ॥

अथ वायुध्यानम् –

वायो सर्वजगत्प्राण कृष्णसारङ्गवाहन ।

पूजां गृहाण कृपया सान्निध्यं कुरु सर्वदा ॥

“आनो॑ नि॒युद्भिः॑” इत्यावाहनम् ॥

अथ कुबेरध्यानम् –

नरवाहन यक्षेश सर्वपुण्यजनेश्वर ।

आवाहितो मया देव पूजां मे सफलां कुरु ॥

“रा॒जा॒धि॒रा॒जाय॑” इत्यावाहनम् ॥

अथ ईशानध्यानम् –

एहीशान नमस्तुभ्यं मृत्युञ्जय महेश्वर ।

पूजां गृहाण कृपया मदनुग्रहकाङ्क्षया ॥

“तमीशा॑नं” इत्यावाहनम् ॥

# त्रिमूर्तीनामावाहनम्

अथ ब्रह्मध्यानम् –

ध्यायामि शारदानाथं ब्रह्माणं परमेष्ठिनम् ।
हंसारूढं चतुर्वक्त्रं सत्यलोकनिवासिनम् ॥

गायत्र्या च सरस्वत्या सावित्र्या च समन्वितम् ।
एहि सर्वजगन्नाथ ब्रह्मलोकपितामह ।
गृहाण मत्कृतां पूजां दीर्घमायुश्च देहि मे ॥
“ब्रह्म॑ जज्ञा॒नं” इत्यावाहनम् ॥

अथ विष्णुध्यानम् –

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम् ।
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यम् ।
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

एह्येहि भगवन् विष्णो शङ्खचक्रगदाधर ।
मया कृतामिमां पूजां गृहाण रमया सह ॥
“तद्विष्णो॑ः” इत्यावाहनम् ॥

अथ रुद्रध्यानम् –

महादेव जटामौले चन्द्रशेखर धूर्जटे ।

मया कृतामिमां पूजां गृहाण परमेश्वर ॥

“त्वमंग्ने” इत्यावाहनम् ॥

## मार्कण्डेयावाहनम्

अथ मार्कण्डेयध्यानम् –

मृकण्डुसूनुं मृगशृङ्गपौत्रं

शिवप्रसादात्तचिरायुषं च ।

ध्यायामि योगीन्द्रमहं ममायुः

वृद्ध्यै जपाक्षेण लसत्कराब्जम् ॥

मार्कण्डेय महायोगिन् शिवध्यानपरायण ।

एह्यस्यां प्रतिमायां त्वं ममायुष्याभिवृद्धये ॥

इति मार्कण्डेयावाहनम् ॥

## नवग्रहावाहनम्

अथ आदित्यादीन् नवग्रहान् तत्तन्मन्त्रेणावाहयेत् ॥

# चिरजीविनामावाहनम्

अथ अश्वत्थामावाहनम् –

अश्वत्थामन् द्रोणपुत्र सर्वशक्तिमतां वर ।
पूजामिमां गृहीत्वा त्वं ममायुर्वृद्धिकृद्भव ॥

अथ महाबल्यावाहनम् –

त्रिविक्रम मनोभीष्टपूरणात्तयशोधन
महाबले गृहाण त्वं पूजां नागालयालय ॥

अथ व्यासध्यानम् –

सर्ववेदसमुद्राणां पारदृश्वन् महामुने ।
पराशरात्मज श्रीमन् पूजां गृह्णीष्व मामि(यात्) ॥

अथ हनुमद्ध्यानम् –

हनुमन्नञ्जनासूनो रामपादाङ्घ्रिषट्पद ।
वायुपुत्र नमस्तेऽस्तु सान्निध्यं कुरु सर्वदा ॥

अथ विभीषणध्यानम् –

धर्माचरणसंप्राप्त सर्वैश्वर्य विभीषण ।
पूजामिमां गृहाण त्वं रामकार्यार्थसाधक ॥

अथ कृपध्यानम् –

कृपाचार्य धनुर्विद्याकौशलार्जितवैभव ।
एह्यत्र भूसुरश्रेष्ठ पूजां मे सफलां कुरु ॥

अथ परशुरामध्यानम् –

जामदग्न्य महातेजः सर्वक्षत्रनिषूदन ।
शिवानुग्रहसंप्राप्त चापविद्य नमोऽस्तुते ॥

## आयुर्देवतावाहनम्

अथ आयुदेवतां “आ॒यु॒र्दा अ॒ग्न” इत्यावाहयेत् ॥

## संवत्सरदेवतावाहनम्

“इ॒दु॒व॒त्स॒रायं” इति संवत्सरदेवतामावाहयेत् ॥

## नक्षत्रदेवतावाहनम्

अथ अश्विन्यादिनक्षत्रदेवतानामावाहनम् –

1. अश्विन्याः अश्विनौ अष्टवाक्यैरावाहयेत् ।
2. भरण्या यमम् ।

3. कृत्तिकाया अग्निम् ।
4. रोहिण्याः प्रजापतिम् ।
5. मृगशीर्षस्य सोमम् ।
6. आर्द्राया रुद्रम् ।
7. पुनर्वसोः अदितिम् ।
8. पुष्यस्य बृहस्पतिम् ।
9. आश्लेषायाः सर्पान् ।
10. मघायाः पितॄन् ।
11. पूर्वफल्गुन्या अर्यमणम् ।
12. उत्तरफल्गुन्या भगम् ।
13. हस्तस्य सवितारम् ।
14. चित्रायाः त्वष्टारम् ।
15. स्वातेर्वायुम् ।
16. विशाखाया इन्द्राग्नी ।
17. अनुराधाया मित्रम् ।
18. ज्येष्ठाया इन्द्रम् ।
19. मूलस्य निर्ऋतिम् ।
20. पूर्वाषाढाया अपः ।

21. उत्तराषाढाया विश्वान्देवान् ।
22. अभिजितो ब्रह्माणम् ।
23. श्रवणस्य विष्णुम् ।
24. श्रविष्ठाया वसून् ।
25. शतभिषजो वरुणम् ।
26. पूर्वप्रोष्ठपदाया अजैकपादम् ।
27. उत्तरप्रोष्ठपदाया अहिं बुध्नियम् ।
28. रेवत्याः पूषणम् ।

इति तत्तदष्टवाक्यैरावाहयेत् ॥

## षोडशोपचारपूजा

अथ आवाहितानां देवानां आसनादिषोडशोपचारैः पूजां कुर्यात्।

## मन्त्रजपः

अथ आचार्यः ऋत्विजश्च कुम्भानन्वारभ्य वक्ष्यमाणमन्त्रान् जपेयुः –

1. वेदादयः
2. त्र्यम्बकम्
3. रुद्रगायत्री
4. दिक्पालकमन्त्राः
5. आपो हि ष्ठादयः
6. हिरण्यवर्णाः
7. पावमान्यः
8. वरुणसूक्तम्
9. ब्रह्मविष्णुरुद्रदुर्गाश्रीभूमृत्युसूक्तानि
10. रुद्राध्यायः
11. चमकम्
12. पुरुषसूक्तम्
13. घृतसूक्तम्
14. अप वा एतस्मात्
15. सर्वेषु वै
16. पञ्चशान्तयः
17. अष्टौ वाक्यानि
18. घोषशान्तिः

19. नमो ब्रह्मणे (त्रिः)

इति ॥

## अग्निकार्यम्

कुम्भस्य पश्चिमे भागे स्वगृह्योक्तविधिनातः ।
हुताशनं प्रतिष्ठाप्य मुखान्तं कारयेत् ततः ॥

त्र्यम्बकमन्त्रेण समिदन्नाज्यानि अष्टोत्तरशतं जुहुयुः।
गायत्र्या तिलान्, नक्षत्राष्टवाक्यैः घृतं च।

होमशेषं समाप्याथ कुम्भानुद्वासयेत् क्रमात् ।
यजमानं सपत्नीकं प्रोक्षेन्मन्त्रैः सुपावकैः ॥

निरीक्ष्य चाज्यं दद्यात्तु यजमानः स्वयं ततः ।
स्नायात् ततः कुम्भजलैः पत्न्या सह सुपावकैः ॥

## स्नानप्रकारः

गोरोचनां गोघृतं च दधिदूर्वाः पयस्तथा ।
फलं पुष्पं दर्पणं च दीपं मृत्स्नां सुवर्णकम् ।
एतानि मङ्गलद्रव्याण्युर्व्यां संस्थापयेत् क्रमात् ॥

आयुः पुष्टिर्यशो धैर्यं मङ्गलं च भवेन्मम ।
इति मन्त्रेण शिरसि लिखेत् गोरोचनां शुभाम् ॥

तेजो रूपं च शीलं च कान्तिश्चापि विवर्धताम् ।
इति मन्त्रेण च दृशौ गोघृतेनाञ्जयेत् स्वयम् ॥

सौभाग्यं च सुगन्धश्च सुखं च मम जायताम् ।
इति दध्ना ललाटे स्वे तिलकं कारयेच्छुभम् ॥

आयुर्दीर्घं तथाऽरोग्यं वपुःस्याद्वज्रसन्निभम् ।
इति मन्त्रेण शिरसि स्वे दूर्वाश्च विनिक्षिपेत् ॥

पय एव बलं नृणामायुर्दीर्घं च यच्छति ।
इति मन्त्रेण शिरसि पयसे च नमो चरेत् ॥

फलं मनोरथफलं प्रददाति सदा नृणाम् ।
इति मन्त्रेण हस्तेन संस्पृशेत् फलमादरात् ॥

श्रीश्च लक्ष्मीश्च मे नित्यं भवेतां मय्यनश्वरे ।
इति पुष्पाणि शिरसि धारयेद्भक्तिसंयुतः ॥

अलक्ष्मीः कालकण्ठी च कुरूपं च विनश्यतु ।
इति मन्त्रेण वीक्षेत विमलं दर्पणं स्वयम् ॥

अन्धकारस्तमश्चैव ह्यज्ञानं च निवर्तताम् ।
इति मन्त्रेन दीपं च पश्येद्भक्तिसमन्वितः ॥

भूमिर्धरित्री भूतानामिति मृत्स्नामुपस्पृशेत् ।
सुवर्णं पावनं नृणां सौभाग्यकरमुत्तमम् ।
इति मन्त्रेण शिरसि निदध्यात् स्वर्णमादरात् ॥

इत्येवमात्मसंरक्षां यजमानः सहाङ्गनः ।
कृत्वा कुम्भजलैः स्नायादघमर्षणमुच्चरन् ॥

स्नानकाले धृतं वस्त्रं दत्वा विप्रवराय च ।
शुद्धवस्त्रं ततो धृत्वा पुण्ड्रं धृत्वा यथाकुलम् ॥

आचार्याय प्रदद्यात् तु प्रधानप्रतिमां ततः ।
ऋत्विग्भ्यश्च यथान्यायं प्रतिमादानमाचरेत् ॥

कृत्वा चाभीष्टदानानि दशदानानि चाचरेत् ।
पञ्चदानं ततः कुर्यात् फलदानं ततः परम् ॥

ततो मङ्गलसूत्रं च पत्न्याः कण्ठे च बन्धयेत् ।
विप्रेभ्यो दक्षिणां दत्वा भक्ष्यभोज्यादिसंयुतम् ॥

भोजयेत् षड्रसं चान्नमाशिषो वाचयेत् ततः ॥

एवं कृते चिरं जीवेत् पुत्रपौत्रादिसंयुतः ।
सर्वारिष्टनिवृत्तिश्च जायते भाग्यवान् भवेत् ॥

इत्ययमुत्तमः कल्पः॥

## त्रयस्त्रिंशत्कलशकल्पः

मृत्युञ्जयस्य प्रधानदेवतायाः एकः कुम्भः, ब्रह्मण एकः, विष्णोरेकः, रुद्रस्यैकः, मार्कण्डेयस्यैकः, दिक्पालानामष्टौ, नवग्रहाणां नव, चिरजीविनां सप्त, नक्षत्रदेवतानामेकः, षष्टिवर्षदेवताया एकः, सप्तर्षीणामेकः, आयुर्देवताया एकः, इति त्रयस्त्रिंशत्कुम्भान् संस्थाप्य पूजयित्वा पूर्वोक्तक्रमेण पूजाहोमदानादिकं चरेत्॥

## द्वादशकलशकल्पः

एतमपि कल्पमनुष्ठातुमशक्तानां अन्यः कल्पः – मृत्युञ्जयस्य प्रधानदेवताया एकः कलशः, ब्रह्मण एकः, विष्णोरेकः, रुद्रस्यैकः, मार्कण्डेयस्यैकः, दिक्पालानामेकः, नवग्रहाणामेकः, चिरञ्जीविनामेकः, नक्षत्रदेवतानामेकः, षष्टिवर्षदेवताया एकः, सप्तर्षीणामेकः, आयुर्देवताया एकः इति द्वादशकलशान् पूर्वोक्तविधिना संस्थाप्य पूजयित्वा जपहोमदानादिकं चरेत्॥

## नवकलशकल्पः

तत्राप्यशक्तानां मृत्युञ्जयस्यैकः, ब्रह्मविष्णुरुद्राणां त्रयः, मार्कण्डेयस्यैकः, नक्षत्रदेवताया एकः, दिक्पालानामेकः, षष्टिवर्षदेवताया एकः, आयुर्देवताया एकः, इति नव॥

# कल्पनिर्णयः

“प्रभुः प्रथमकल्पे सन् योऽनुकल्पेन वर्तते ।
न साम्परायिकं तस्य दुर्मतेरजितात् मनः” ॥

इत्यादिवचनैः उत्तमकल्पानुष्ठानशक्तः पुरुषः वित्तशाठ्येन मध्यमादिकल्पेषु न प्रवर्तेत। तथा मध्यमकल्पानुष्ठानशक्तोऽपि न ततोऽवरकल्पयोः प्रवर्तेत। यदि प्रवर्तेत कर्मवैगुण्यं स्यात्॥

॥ इति शौनकोक्तः षष्ट्यब्दपूर्तिशान्तिकल्पः ॥